# वैदिकवाङ्मयेषु कात्यायनश्रौतसूत्रस्योपादेयता

डॉ. अश्विनीशुक्ला

वेदस्यार्थः –

ज्ञानार्थक-विद्-धातोः निष्पन्नो वेदशब्दः तस्यार्थः ज्ञानम् एवास्ति । एतद् ज्ञानंसमस्तम् आध्यात्मिकं एवञ्च लौकिकं ज्ञानस्य स्रोतं ईश्वरीयं ज्ञानं वक्तुं शक्यते । प्राचीनं ऋषीणां प्रतिभायाः प्राप्त सत्यं ज्ञानम् एवं वेदः परमं प्रमाणम् आगम: शब्दप्रमाणेषु उत्कृष्टो वर्तते । अतः वेदेषु सर्वं ज्ञानं तत्रैव लभ्यते । एतेषां ज्ञान विश्वेऽस्मिन् अत्रैव द्रष्टुं शक्यते ।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।।[1]

सायणाचार्यः तैत्तिरीय-संहितायां भाष्यभूमिकायां यत् लिखितं (इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः) विद्यते ज्ञायतेऽनेनेति वेदः इत्यर्थः येन विधिना यत् ज्ञानं प्राप्यते सः वेदः इत्युच्यते ।

वेदस्य स्वरूपम् –

प्राचीन-परम्परायाः वेदस्य, अन्तर्गतं मंत्र एवं ब्राह्मणं, द्वौ भागौ निहितौ वर्तते । (मन्त्रब्राह्मणयोर्वेदनामधेयम्) यस्य उच्चारणं कृत्वा यज्ञ-यागादिषु अनुष्ठानं क्रियते एवं यज्ञेषु देवानाम् आवाहनं स्तुतिः क्रियते तदेव मन्त्रः उच्यते। कर्मणातन्मन्त्राणां व्याख्यानग्रन्थः ब्राह्मणाम् इत्युच्यते । वैदिकवाङ्मयं चतुर्धा विभज्यते । वेदस्य षडङ्गेषु महत्त्वम् वर्तते ।सम्पूर्णवैदिकसाहित्यस्य विकासः वेदानां रक्षार्थम् अभवत्। वेदाङ्गशब्दः उपकारक इत्यर्थः। चतुर्षु वेदेषु एव वेदाङ्गं गणना प्रसङ्गेषु अपरा विद्या कथयते। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति एतेषु षडङ्गेषु वेदस्यार्थ त्रीणि प्रमुखानि उद्देश्यानि वर्तन्ते । बोधः (व्याकरणम् एवं निरूक्तं ) वर्तते । तथैव वेदेषु याज्ञिकप्रयोगः (कल्प एवं ज्योतिषं) शास्त्रं वर्तते ।

पाणिनीयशिक्षायाः वेदाङ्गानं विषयेषु वेदपुरुषस्य विविध-अवयवानां श्लोकः प्रतिपादितम्–

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते।।[2]

शिक्षा, कल्प, व्याकरणं, निरुक्तं, छन्दः ज्योतिषम्।

कल्पेषु विभिन्नं वैदिकशाखानां ब्राह्मणग्रन्थानां विहित कर्म एव व्यवस्थितं वर्णनं कल्पवेदाङ्गेषु वर्तते

कल्पो वेदविहितानां कर्मणानुपूर्व्येण कल्पना शास्त्रम्। कल्पशास्त्रं चतुर्धा विभज्यते। श्रौतसूत्रं, गृह्मसूत्रं धर्मसूत्रं शुल्वसूत्रं चेति।

श्रौतसूत्रेषु वैदिक ब्राह्मणानां वर्णितं यज्ञ-यागादि विवरण प्राप्यते । वैदिकयागस्य प्रतिपादितं याग: श्रौतयागः: कथयते । तदा सः सप्तहविर्यागः सप्त सोमयागादि प्राप्यते। शुक्लयजुर्वेदस्य श्रौतसूत्रं शुल्बसूत्रञ्च महर्षिणा कात्यायेन प्रणीतम् एवं कात्यान: याज्ञवल्क्यस्य पुत्रः याज्ञवल्क्यस्य द्वितीयायां पत्न्यां कात्यायन्यां जनिं लेभे। तेन च वाजसनेयशाखिनां श्रौताग्निकर्मसाधनपद्धतिदर्शकानि सूत्राणि कल्पसूत्रम् । शुल्वसूत्रेषु यज्ञवेदिका निर्माणस्य विधिनां वर्णितमस्ति । अल्पाक्षरत्वे बहर्थबोधकत्वं सूत्रत्वं इत्युक्तं वर्तते।

हविर्यागेषु घृत पायस दधि पुरोडाशादि आहुति प्रदीयते । तदरीत्या अग्न्याधान अग्निहोत्रं, दर्शपूर्णमासं, आग्रहायणं, चातुर्मास्यं निरूढपशुबन्धं एवं सौत्रमणी यागस्य विवेचनं वर्तन्ते। सोमयागस्य प्रभेद: अग्निष्टोमः अत्यग्निष्टोमः, उक्थ्यः पोडशी; वाजपेय: अतिरात्रः एवं 'आप्तोर्याम एतेषु यागेषु श्रौतयागस्य यत् सर्वमपि विधिः कर्मः सूत्ररूपेण महर्षिकात्यायनेन कात्यायनश्रौतसूत्रम् इत्यस्मिन्ग्रन्थं कर्मकाण्डविधि: सम्यक् रूपेण प्रतिपादितम् वर्तते। तदा तेषां ग्रन्थानां अन्येषु भाषायां सरली कृतः वर्तते।

कात्यायन-श्रौतसूत्रं परिभाषा निरूपणं प्रसङ्गे सति कस्य यज्ञं कर्तुं अधिकारः सन्ति तेषां निर्णयः, श्रौतसूत्रेषु प्रदत्तं वर्तते यतोहि - (अथातोऽधिकारः[3]) अथ

वेदाध्ययनम् अतः वेदाध्याध्यायनस्य कर्तव्यव्यापारः फलभोक्तृत्व समानाधिकरणव्याख्यास्ते इतिशेषः वेदाध्ययन वृत्ते तदनंतरं तादृशवेदवेद प्रतिपादितेषु कर्मसुः अधिकार: अनुष्ठानरूपो व्यापारः - फलयुक्तानि कर्माणि:[4] सर्वाण्यपि कर्माणि वेदोक्तानि फलजनकान्ये वेत्यर्थ: । एवं च स्वर्गकामादिपदं पुरुष विशेषणं सदपि विशेषणी भूतस्वर्गादि बोधकमर्थाद भवति। अन्यथा फले कर्मणि पुरुषस्य प्रवृत्यनुदयाद वेदवाक्य प्रवर्त्तकत्वमेव भज्येत। अतश्च यत्रापि फलं न श्रूयते तत्रापि फलं कल्पनीयमेवेति भावः।

बहुप्रकाराणि कर्माणि सन्ति, एतेषु भिन्नताऽपि दृश्यते। तेन स्मार्ताग्निकर्म पद्धतिनिदर्शकानि सूत्राण्युपनिबद्धानि तदनुरोधेनैवेदानीं वाजसनेयिनां गर्भाधानादि षोडशसंस्कारकर्माणि प्रवर्तन्ते। आदित्य सम्प्रदायान्तर्गतो यजुर्वेदः शुक्लयजुर्वेद ब्रह्मसम्प्रदायान्तर्भूतश्च कृष्ण यजुर्वेदोऽस्ति । शुक्लयजुर्वेदस्य पञ्चदशशाखा: भवन्ति । श्रौतयज्ञीयकुण्डमण्डपेष्टकादीनां निर्माणार्थ एकमेव कात्यायनश्रौतसूत्रम् वर्तते । प्राकृतानां विकृतानां च यज्ञानां स्वरूपनिर्धारण श्रौतसूत्राणामेव वोद्देश्यम। तेषु अग्निहोत्रादि यज्ञानां विधिः दृश्यते। यागानां नियमानियज्ञीयपदार्थाना शुद्धता, हवनसामग्रीनां संग्रह: दक्षिणादाननियमानां ज्ञानं श्रौतसूत्रैरेव भवति ।

श्रौतसूत्राणामध्ययनस्याभावे यागविधिं व्यवस्थितरूपेण ज्ञातुं समर्था न जायते। दानम-वाचनक्रिया अन्वारभण वर-वरण-स्पर्श-दक्षिणां पयोव्रतादेर्ज्ञानम यागीय-वस्तूनां बोधः श्रौतसूत्रैरेव भवति। तत्र श्रुतौ तावत् वैदिककर्माणि पञ्चधं विभक्तानि । स एष यज्ञः पञ्चविधिः अग्निहोत्रम्, दर्शपूर्णमामः, चातुर्मास्यानि पशुः, सोम: इति । अतः यजुर्वेदस्य शाखा: कात्यायनश्रौतसूत्रम् -षड्विंशत्यध्यायेषु विभक्तं वर्तते। श्रौतसूत्राणामावश्यकता। परन्तु कालवशात् बुद्धिक्षमतायां ह्रासे संजात: एक साम्प्रतिके झञ्झामये वातावरणे निखिलं जगत् विविधै रूपदेवैरुत्पातैः आस्तिक: वैदिककर्मकाण्डपद्धत्या यथाविधि देवान् उपासते तथा च देवताद्देशेन पञ्चामृतं फलं दुग्धं दधिमध्वादीनि बहुमूल्यानि वस्तूनि समर्प्य धनमायुः पुत्रं गृहं स्वरक्षां विश्वकल्याणं च याचन्ते श्रौतस्मार्तयागानां चानुष्ठानं कुर्वन्ति ।

द्रव्यं देवता त्यागः[5]

फल-पुष्पदधि - ब्रीहियवादिपदार्थानां इन्द्रादिदेवातानां कृते त्याग: समर्पण

वा यज्ञः यज्ञै: प्राणिनां निरन्तरमुन्नतिः प्रदीयते स्मः । यजदेवपूजा संगतिकरण दानेषु यजधातो यज्ञ शब्दं निष्पपद्यते । यत्र कर्मकाण्डइन्द्रादि देवतानां पूजनं क्रियते तदा देवैः सह जनानां मित्रता भवति जना: देवेभ्यः किमपि ददति। एतादृशं कर्मकाण्ड यज्ञशब्देन उच्यते। अत एव यज्ञाना व्याख्यानमेव श्रौतसूत्राणामुद्देश्यम्। यज्ञविषयकज्ञानं तु संजातम् । शास्त्रेषु कर्मणां विधानं त्रैविध्यं दृश्यते। होम: इष्टि: भागश्च एतेषु काश्चनप्रकृतयः काश्चनविकृतयश्च काश्चन उभयात्मकाः प्रकृतिकर्मसु सर्वेषामङ्गानां विधानमस्ति । प्राकृतानां विकृतानां च यज्ञानां स्वरूपनिर्धारणं श्रौतसूत्राणामेवोद्देश्यम् । अतः भगवतः महर्षिः कात्यायनप्रणीतं कात्यायनश्रौतसूत्रस्योपादयेता वर्तते। एनं विनैव यत् किमपि यज्ञं कर्तुं नैव शक्यन्ते। यज्ञेन मानावानां कल्याणं निहितमस्ति । अतः अस्य ग्रन्थस्योपादयेता अस्त्येव इति।

भारतीयसंस्कृतौ मानवजीवनस्य सम्पूर्णतां सार्थकतां च साधयितुं चतुर्वर्गस्य प्रवर्तनभूत्। चतुर्वर्गे धर्म: अर्थ: काम: मोक्षश्चेति चतुर्विधाः पुरुषर्थाः भवन्ति। मानवजीवने षोडशसंस्काराणां श्रौतसूत्रे विद्यमानाः वर्तन्ते ।

अत्र ये षोडश संस्काराः परिचाययन्ते, ते सन्ति- गर्भाधानम्, पुंसवनम्, सीमन्तोत्रयनम्, जातकर्म, नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, चूडाकर्म, कर्णवेधः, विद्यारम्भः, उपनयनम्, वेदारम्भः, केशान्तः, समावर्तनम्, विवाहः, अन्त्येष्टिः चेति।

**गर्भाधानसंस्कारः**

शिशोर्जन्मनः प्राक् तन्निमित्तको यः संस्कारः, स एव गर्भाधानसंस्कारः। अथवा शिशोर्मातुर्गर्भे बीजरूपेण प्रतिष्ठापनं गर्भाधानमुच्यते। दम्पती सोपवासं यज्ञादिकर्मणा मनः पवित्रीकृत्य परस्परमनुरागेण देवस्तवनपूर्वकं सन्तानोत्पत्तौ प्रवर्तते। वैदिककाले अस्मिन्नवसरे विष्णु-त्वष्ट्र-प्रजापति-सरस्वतीनां स्तवनं क्रियते स्म। बृहदारण्यकोपनिषदि विशिष्टान् पुत्रान् प्राप्तुं विशिष्टभोजनानां विधानं वर्तते। गर्भाधानसंस्कारे कालस्य शुभाशुभत्वमपि विचारणीयं भवति।

ऋतुकाले एव स्त्री गर्भधारणयोग्या भवति। रजोदर्शनात् षोडशरात्रयः स्त्रीणां ऋतुकाल उच्यते। तत्रारम्भिकं रात्रिचतुष्टयं सम्भोगाय निषिद्धम्। तदनन्तरं शुभतिथिनक्षत्रेषु गर्भाधानं समर्थ्यते। समदिनेषु पुत्रोत्पत्तिः विषमदिनेषु च

कन्योत्पत्तिः भवति। तदुक्तं मनुस्मृतौ-

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्माद् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियाम्॥[6]

संस्काराणां व्याप्तिः न केवलं सम्पूर्ण जीवने अपितु जीवनस्य पूर्वापरभागेऽपि दृश्यते। यथा मरणादनन्तरं मृतस्यान्त्येष्टिसंस्कारो विधीयते, तथैव जन्मतः प्रागपि जनिष्यमाणस्य

गर्भाधानसंस्कारो भवति। संस्कारोऽयं यथा पुत्रस्य कल्याणाय तथैवात्मनः कल्याणाय अपि स्वीक्रियते। पुत्रोत्पत्त्या पिता पितृणां ऋणाद् मुक्तो भवति। तदुक्तं तैत्तिरीयसहितायाम्- "जायमानो वै ब्राह्मणस्त्रिभिऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः। एष वा अनृणी यः पुत्री यज्वा ब्रह्मचारी वा स्यादिति।"

पुंसवनसंस्कारः

पुंसः सवनं पुंसवनमित्युच्यते। गर्भलक्षणे दृष्टे सति पुंसवनसंस्कारस्य विधानं धर्मशास्त्रेषु वर्णितम्। याज्ञवल्क्यानुसारेण गर्भाशये गर्भगतेरारम्भात् पूर्वमेव संस्कारोऽयं सम्पादनीयः। येन संस्कारेण गर्भस्थजीवः पुमान् क्रियते, सः पुंसवनसंस्कार इत्युच्यते। भारतीयसंस्कृतौ स्त्री अपि पुरुषत्वस्य प्रक्रियायामेव भवति। तेन संस्कारोऽयं स्त्रीजातकेऽपि तथैव फलवान् भवति यथा पुरुषजातके। तथापि पुत्रप्राप्तिकामनया संस्कारोऽयं स्वीक्रियते। पारस्करगृह्यसूत्रे बौधायनगृह्यसूत्रे चोक्तं यत् कस्मिंश्चित् पुंनक्षत्रे पुत्रेच्छया क्रियमाणोऽयं संस्कार इति।

संस्कारोऽयं क्रमेण द्वितीयः स्वीकृतः। अयं संस्कारो गर्भनिश्चयात् परं तृतीये मासे क्रियते। यदि तृतीये मासे गर्भस्थितेः सम्यक् ज्ञानं न स्यात्तर्हि चतुर्थे मासेऽपि संस्कारोऽयं सम्पादयितुं शक्यते। गर्भस्य संस्कारतया क्रियमाणं केचिदमुं संस्कारं प्रतिगर्भं कुर्वन्ति। गर्भिण्याः संस्कारं मन्यमानाश्चान्ये सकृदेव संस्कारममुं सम्पादयन्ति।

अस्मिन्नवसरे गर्भिण्याः अङ्के जलेन पूर्णं पात्रं निधाय गर्भरक्षायै पुत्रप्राप्तये च विष्णुप्रमुखाणां देवानां स्तुतिर्विहिता। आयुर्वेदानुसारेण वटशुंगस्य सुलक्ष्मणायाः सहदेव्याः वा रसो दुग्धेन सम्मिश्रय गर्भवत्याः दक्षिणनासिकायां पातनीयः। तेन गर्भस्य रक्षा पुंस्त्वप्राप्तिश्च भवति।

सीमन्तोन्नयनसंस्कारः

गर्भवत्याः नार्याः सीमन्तः उन्नीयते यस्मिन् कर्मणि तत् सीमन्तोत्रयनम्। अस्मिन् संस्कारे गर्भवत्याः केशपाशमलङ्कुर्वन् पतिः स्वयमेव सौमन्तमुन्नयति। उत्सवप्रायोऽयं संस्कारो गर्भरक्षाकरः प्रोक्तः। वैदिकयुगे सीमन्तोन्नयनावसरे वीणावादिनो वीणावादनपूर्वक सोमराजस्य स्तुतिमकुर्वन्। गर्भस्य रक्षायै संस्कारोऽयमिति -

पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः।
आयान्ति काश्चिद् राक्षस्यो रुधिराशनतत्पराः ।।
तासां निरसनार्थाय श्रियमावाहयेत्पतिः।
सीमन्तकरणी लक्ष्मीस्तामावहति मन्त्रतः ।।

गृह्यसूत्रेषु प्रतिपादितं यद् गर्भतश्चतुर्थे षष्ठे वा मासे संस्कारोऽयं सम्पादनीयः। स्मृतिषु अयं संस्कारः षष्ठे अष्टमे वापि मासे प्रोक्तः। गर्भसंस्कारः क्षेत्रसंस्कारो वायमिति मतभेदे केचिदाचार्याः सर्वेषु गर्भकालेषु केचिच्च प्रथमगर्भकाले एव संस्कारममुं निर्दिशन्ति। संस्कारेऽस्मिन् गर्भवत्याः दोहदपूर्तिरपि सङ्केतिता। अस्मिन्नवसरे गर्भिण्याः स्वास्थ्यसम्बन्धिनः केचन नियमाः अपि निर्दिष्टाः। यथा सन्ध्याकाले न शयीत, रात्रौ न जागृयात्, यात्राधिकं न कुर्यादित्यादि।

जातकर्मसंस्कारः

शिशोर्जन्मनः परं सद्यः एवायं जातकर्मसंस्कारः सम्पाद्यते। जाते शिशौ पिता नान्दीपाठश्श्राद्धादिकं सम्पाद्य नाभिच्छेदनात् प्रागेव मन्त्रोच्चारणपुरःसरं सुवर्णशलाकया मधुसर्पिषोः प्राशनं कारयेत्। तदुक्तं मनुस्मृतौ –

प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते।
मन्त्रवत् प्राशनं चास्य हिरण्यमधुसर्पिषाम्।।[7]

ततः पिता शिशुकर्णसमीपमागत्य वाग्वाग्वागिति वाक्शब्दं त्रिरुच्चारयति। बृहदारण्यके प्रथमं दक्षिणकर्णे वाक्शब्दोच्चारणं ततश्च दधिमधुघृतप्राशनं चेति क्रमभेदो दृश्यते "वाग्वागिति त्रिरथ दधिमधुघृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति, भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भुभुर्वः स्वः सर्वं त्वयि दधामीति।"

पश्चात् पिता शिशुकस्य गृह्यं नाम कुर्याद् 'वेदोऽसि' इति। ततः नाभिच्छेदनं विधाय शिशुः स्नाप्यते। तदनन्तरं पिता सरस्वतीं स्तुवन् शिशुं मातुः स्तनपानाय प्रयच्छति। पुत्रजन्मनि तद्दिने क्वचिद् निरन्तरमग्निः प्रज्वाल्यते। द्वादशसु पात्रेषु सुपक्वः पुरोडाशो वैश्वानराय समर्पते। दुग्धाज्यहविषा होमश्च क्रियते। जातकर्म संस्कारस्य द्वितीयं नाम आयुष्यकरणमस्ति।

अयं संस्कारोऽत्यन्तं प्राचीनः महत्वपूर्णश्च। बृहदारण्यकोपनिषदि जातकर्मणः सविस्तरं वर्णनं लभ्यते। गृह्यसूत्रेषु च संस्कारस्यास्य व्यवस्थापनं दृश्यते। किन्तु तत्र विधिमन्त्रादीनां क्रमिकप्रयोगविषये मतैक्यं नास्ति। पुत्रजन्मोत्सवे पिता प्रायशो दानमकरोत्।

नामकरणसंस्कारः

नामकरणसंस्कारस्य कालविषये शास्त्रेषु बहुविधो विचारः कृतः। जन्मतो दशमदिनादारम्य द्वितीयवर्षस्य प्रथमदिवसं यावदस्य संस्कारस्य विधानं धर्मशास्त्रकारैः विहितम्। मनुः जन्मतो दशमे द्वादशे वा दिवसे नामकरणसंस्कारं निर्दिशति। यदि तद्दिने न स्यात्तर्हि यस्मिन् कस्मिन्नपि शुभमुहूर्ते संस्कारोऽयं सम्पादयितुं शक्यते। तदुक्तं मनुस्मृतौ-

नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत्।
पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते ।।[8]

जातकर्मसंस्कारे 'वेदोऽसि' इति गुह्यं नाम पित्रा कृतम्। नामकरणसंस्कारे व्यावहारिकं नाम कुलदेवतानुसारेण जन्ममासानुसारेण राशिनक्षत्रानुसारेण लोकानुसारेण वा क्रियते। गृह्यसूत्राणां जटिलनियमान् परित्यत्य मनुः नामकरणस्य सरलनियमं प्रतिपादितवान्। तद्यथा-

माङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ।।
शर्मवद् बाह्मणस्य स्यात् राज्ञो रक्षासमन्वितम्।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्।।
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्।।[9]

गृह्यसूत्रेषु चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तस्थं पुंसाम्, ईकारान्तमयुजाक्षरं च स्त्रीणां नाम प्रशस्तं भवति। द्व्यक्षरनामनि लौकिकैश्वर्यस्य चतुरक्षरनामनि चाध्यात्मिकाभ्युदयस्य कामना भवति। बौधायनानुसारेण पुरुषाणां नामानि ऋषिदेवपूर्वजानां नामान्याश्रित्य भवेयुः। तत्र साक्षादेव देवानां नामानि न ग्रहीतव्यानि। विष्णुपुराणानुसारेण वैश्यशूद्रयोः नाम गुप्त-दासात्मकं युज्यते। शर्म-वर्मात्मकं नाम ब्राह्मणक्षत्रिययोः श्रूयते। बृहदारण्यके मृत्योः पश्चादपि नाम्नो महत्त्वमुदीरितम्।

निष्क्रमणसंस्कारः

शिशोः जन्मनः परं प्रथमतया गृहाद् बहिरानयनमेव निष्क्रमणम्। बालकस्यायं संस्कारो जन्मतश्चतुर्थे मासे भवति। केषाञ्चन मतेन सूर्यदर्शनं तृतीयमासे चन्द्रदर्शनञ्च चतुर्थमासे विधीयते। तद्यथा वीरमित्रोदये यमस्मृतेः पद्यमुद्धृतम्-

ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्।
चतुर्थमासि कर्तव्यं शिशोश्चन्द्रस्य दर्शनम्॥

किन्तु पारस्करगृह्यसूत्रे मानवगृह्यसूत्रे च 'चतुर्थे मासि निष्क्रमणिका। सूर्यमुदीक्षयति तच्चक्षुरिति' इत्येवं चतुर्थमासस्यैव विधानं कृतम्। मनुस्मृतावपि तदेव समर्थ्यते।

निष्क्रमणमुहूर्ते गृहाद् बहिः बालकस्य माता चतुरस्त्रां भूमिं परिष्कृत्य गोमयेनोपलिप्य स्वस्तिचिह्नं कृत्वा तण्डुलान् विकिरति। ततस्तत्र बालकस्य पिता उत्थितः सन् बालकं क्रोडे कृत्वा मन्त्रोच्चारणपूर्वकं सूर्यं दर्शयन् बालकस्य शतायुष्यं कामयते। ब्राह्मणाँश्च दक्षिणादिभिः सन्तोष्य संस्कारोऽयं सम्पाद्यते। रात्रिकालिके निष्क्रमणमुहूर्त चन्द्रदर्शनं युज्यते।

अन्नप्राशनसंस्कारः

गृह्यसूत्रेषु स्मृतिषु च जन्मतः षष्ठे मासे शिशोः अन्नप्राशनसंस्कारो विहितः। जन्मकाले दधिमधुघृतानां प्राशनमभूत्। पुनर्यदा शिशुरन्नपाचनयोग्यो भवति, तदा षष्ठमासे अन्नप्राशनं संस्कारतया प्रोक्तम्। अन्नं जीवने नितान्तमावश्यकं भवति। तदन्नग्रहणं संस्कारेण समन्वितं स्यादिति प्रतीकं गृहीत्वा संस्कारोऽयं सम्पाद्यते। व्यक्तित्वविकासे आहारशुद्धिरनिवार्या मन्यते। तदुक्तं छान्दोग्योपनिषदि-

"आहारशुद्धौ सत्त्वशुद्धिः[10]
सत्त्वशुद्धौ ध्रुवा स्मृतिः
स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" इति।

अन्नप्राशनसंस्कारे पदे पदे अन्नदेवस्य स्तुतिर्विहिता संस्कारदिने मन्त्रपाठेन सह भोजनं पच्यते। पिता शिशोः पुष्टये अग्नौ हविर्जुहोति। ततः शिशवे अन्नस्य ग्रासं ददानः पिता 'भुर्भुवः स्वः' इत्युच्चारयति। आयुर्वेदानुसारेण लघुहितमन्नं शिशवे दातव्यम्। दधिमधुघृतमिश्रं भक्तं युज्यते। क्षीरान्नेन शिशोरन्नप्राशनं लोके प्रचलति।

परवर्तिकाले अन्नप्राशनावसरे शिशोर्भाविजीवने जीविकाविशेषस्य पूर्वानुमितिः सुपरीक्षिता। तदर्थं देवानां सन्निधौ बहूनां व्यवसायानां प्रतीका: लेखनी-पुस्तक तुला रुप्यकादयः स्थाप्यन्ते। तेषु प्रथमं यद्वस्तु शिशुरचिनोति, तद्रूपमेव तस्य जीविका सम्भाव्यते।

चूडाकर्मसंस्कारः

'चूडा' इत्यस्यार्थौ भवति 'शिखा'। 'चूडाकर्म' इत्यस्य नामान्तरं चौलकर्म, चूडाकरणं, मुण्डनं चेति। चूडाकर्मसंस्कारे केशानां कर्तनं मुण्डनं वा विधाय शिरसि शिखा (चूडा) स्थाप्यते। शिखाधारणं चूडाकर्मसंस्कारस्य प्रधानमुद्देश्यम्। शिखया यज्ञोपवीतेन च विहीनो जनः संस्कारवान् न मन्यते ।

चूडाकरणात् प्रभृति शिखाधारणं भवति। शिखायाः मूले शिरा-सन्धीनां सम्मिलनं भवति। आदायुर्वेदोऽपि शिखायाः महत्त्वं प्रतिपादयति। आश्वलायनगृह्यसूत्रे चूडाकर्म दीर्घायुषे, यशसे ।

चूडाकर्म शिशोः प्रथमे तृतीये पञ्चमे सप्तमे वाऽष्टमे वर्षे क्रियते। उपनयनसमयेऽपि कर्तुं शक्यते। संस्कारोऽयं कुलदेवतायाः सान्निध्ये जागृते तीर्थे देवमन्दिरे वा भवति। सुमुहूर्त माङ्गलिकं विधानमनुष्ठाय माता बालक क्रोडे कृत्वा उपविशति। पिता मन्त्रोच्चारणपूर्वक सकुशान् केशान् कर्तयित्वा गोमये निधापयति। पश्चात् नापितः मुण्डनेन शिखां सम्यक् सम्पादयति। छिन्नकेशाः सुगुप्ते स्थाने सरोवरे भूमिगतं वा विसर्जिताः क्रियन्ते। शिरसि चूडा कुलरीतिमनसृत्य स्थाप्यते। तद्यथा - "दक्षिणतः चूडा वशिष्ठानाम्, उभयतोऽत्रिकाश्यपानाम्.... यथाकुलधर्म वा"।

कर्णवेधसंस्कारः

नाम्नैव संस्कारस्यास्य स्वरूपं स्पष्टं भवति। वेदेषु प्राचीनगृह्यसूत्रेषु च संस्कारतया कर्णवेधस्य उल्लेखो न लभ्यते। परवर्तिनि युगे संस्कारोऽयं प्राचलदिति सम्भाव्यते। यास्कस्य निरुक्ते कर्णवेधस्य उल्लेखः प्राप्यते।

जन्मनो दशमे षोडशे वा दिने कर्णवेधसंस्कारो प्रोक्तः। बोधायनः सप्तमे अष्टमे वा मासे कर्णवेधं प्रोक्तवान्। गर्गः द्वादशे मासेऽपि कर्णवेधं कथयति। कात्यायनः तृतीये पञ्चमे का वर्षे कर्णवेधस्य विधानं करोति। कर्णयोः वेधनं वैद्यः सुवर्णकारो वा विदधाति। कर्णवेधनाय सूची सौवर्णी राजती लौही वा भवति। बालकस्य प्रथमं दक्षिणकर्णः बालिकायाश्च प्रथमं वामकर्णो विध्यते।

भाविजीवने क्रोधोपशमनाय, अण्डकोशवृद्धिं आन्त्रवृद्धि (हार्निया) च निरोद्धं, कर्णाभूषणं च धारयितुं कर्णवेधो युज्यते। मध्ययुगस्य स्मृतिकारो देवलः कर्णवेधस्य धार्मिक महत्त्वं प्रतिपादयन् लिखति ।

### विद्यारम्भसंस्कारः

विद्यारम्भस्यापरं नाम' अक्षरारम्भ' इत्यस्ति। तेन प्रतीयते यद् वर्णमालायाः विकासयुगे संस्कारोऽयं प्रावर्तत इति। गृह्यसूत्रेषु प्राचीनस्मृतिषु चास्य संस्कारस्योल्लेखो नास्ति। परवर्तिकालस्य वीरमित्रोदये, स्मृतिचन्द्रिकायां, संस्काररत्नमालायां, याज्ञवल्क्यस्मृतेः अपरार्कव्याख्यायां चास्य संस्कारस्य प्रमाणमुपलभ्यते। मन्ये पुरा उपनयनादेव विद्यारम्भो भवति स्म। पश्चात् कौटिल्यस्यार्थशास्त्रे भवभूतेरुत्तररामचरिते च चूडाकर्मसंस्कारेण सहैव वेदेतरविद्यारम्भस्य सूचना लभ्यते। तत्पश्चाच्च विद्यारम्भः स्वतन्त्रसंस्काररूपेण प्रवर्तितोऽभूत्। प्रायशः पञ्चमे वर्षे सूर्योत्तरायणे सुमुहूर्ते संस्कारोऽयं विधीयते। सुस्नातः सुवेशश्च बालको गुरोः सम्मुखमानीयते। गणपत्यादिपूजनं हवनं च सम्पाद्य गुरुः प्रसृतेषु तण्डुलेषु अङ्गुल्या लेखन्या वा बालकस्याक्षरारम्भं प्रणवाक्षरेण कारयति।

### उपनयनसंस्कारः

उपनयनसंस्कारः संस्कारेषु सर्वप्रधानः स्वीक्रियते। लोको वेदश्चेति द्विधा विभागे लोकाद् वेदे यदानयनं तदुपनयनमुच्यते। उपनयनसंस्कारानन्तरमेव कश्चिद् वेदाध्ययनस्य अधिकारी भवति। लौकिकं ज्ञानमेव पूर्णतायै न भवति। तदर्थं वैदिकं

ज्ञानमपि नितान्तमावश्यकम्। लोकवेदयोर्द्वयोरपि विज्ञाता आचार्यस्तत्र ब्रह्मचारिणां गतिर्भवति। अत एव पाणिनिः उपनयनस्यापरं नाम आचार्यकरणमिति लिखति। आचार्येण ब्रह्मचारिणः स्वीकरणमेवोपनयनम्। आचार्यः स्वभाव- सम्पन्नं शिष्यं स्वीकृत्य वेदविद्यां ब्रह्मविद्यां वा सम्यगध्यापयति । ब्रह्मविद्यायाः सन्धारणादेव शिष्यो ब्रह्मचारी कथ्यते। एतादृगयं संस्कारो द्विजानां द्वितीयं जन्म भवति। आचार्य एवात्र द्वितीयस्य जन्मनः प्रदाता। स एकाकी मातापित्रोः द्वयोरपि, भूमिकां दिव्यतया निर्वहति। व्यवस्थापनात् पितृत्वं तस्य निर्विवादम्। मातृत्वं चापि तस्य प्रतिपाद्यते-

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्त्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।अथर्ववेदे ११.५.३

वैदिकयुगे माणवकः समित्पाणिः स्वयमेव आचार्यसमीपं गत्वा न्यवेदयत् *ब्रह्मचर्यमागाम्' इति। आचार्यस्तु तस्य परिचयं पृष्ट्वा हस्तं च गृहीत्वा देवादीनां साहाय्येन तमात्मनः ब्रह्मचारिणं करोति। अथ समिदाहरणादिकं कर्मोपदेशं कृत्वा सप्रणवां गायत्रीमुपदिशति। गायत्री वेदमाता कथ्यते। तस्मात् सन्ध्यासु गायत्रीं जपन्, ब्रह्मचारी ब्रह्मचर्याश्रमे वेदोपवेदं वेदाङ्गादिकं आचार्यादधीयानस्तिष्ठति।

परवर्तियुगे उपनयनस्य पद्धतिः दीर्घा कृता। तत्रादौ उपनयनस्य योग्यकालो निर्धारितः। तद्नुसारेण वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, शरदिं च वैश्यम्। एवमेव गर्भादष्टमे वर्षे ब्राह्मणस्य, गर्भादकादशे राजन्यस्य, गर्भाद् द्वादशे च वर्षे वैश्यस्योपनयनं प्रोक्तम्। मनुः उपनयनस्य प्राथमिकीं पार्यन्तिकीं चावस्थां निर्धारयति। तद्यथा -

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैयस्येहार्थिनोऽष्टमे ॥[11]

प्रचलितायां विस्तृतोपनयनपद्धती कतिपयमुख्यबिन्दवः सन्तिमण्डपाच्छादनं गणपत्यादिपूजनञ्च, बालकस्य मुण्डनं स्नानञ्च, कौपीनधारणमाचार्योपगमनञ्च, मेखलाबन्धनम्, यज्ञोपवीतप्रदानं, अजिन-(मृगचर्म) धारणं दण्डधारणञ्च आचार्येण माणवकाञ्जलौ जलाञ्जलिप्रदानं, सूर्यदर्शनं, हृदयस्पर्शः, अश्मारोहणम्, आचार्येण माणवकस्य हस्तग्रहणं शिष्यतया स्वीकरणञ्च, व्रतादेशः, गायत्रीमन्त्रप्रदानम्, आह्वनीयाग्निस्थापनं हवनञ्च, भिक्षाटनं

ब्रह्मचर्यव्रतग्रहणञ्चेति।

उपनयनसंस्कारोऽयमधुना यज्ञोपवीतसंस्कार इत्युच्यते। सूत्रनिर्मितस्य आधुनिकयज्ञोपवीतस्य प्रचलनं वैदिकयुगे नासीत्। तदा यज्ञावसरे उत्तरीयं यज्ञोपवीतविधिना ध्रियते स्म। तदुत्तरीयं प्रायशो मृगचर्म एव। तत्स्थाने समग्रं जीवनमेव यज्ञं मत्वा सदैव यज्ञोपवीतस्य धारणं मन्ये सूत्रयुगे प्रवर्तितम्। यज्ञोपवीतसंस्कारस्य पश्चादाचार्यः शिष्यस्य शौचाचार, अग्निकार्य, सन्ध्योपासनं च शिक्षयति।

**वेदारम्भसंस्कारः**

वेदारम्भो नामायं संस्कारः उपनयनसंस्कारानन्तरं वेदपाठस्यारम्भं सूचयति। गृह्यसूत्रेषु धर्मसूत्रेषु चायं संस्कारः पृथक्तया नोक्तः । सर्वप्रथमं व्यासस्मृती वेदारम्भसंस्कारः

प्रतिपादितः। गौतमः संस्कारगणनायां चतुर्णां वेदव्रतानां ग्रहणं संस्कारतया लिखति। तानि वेदव्रतानि सन्ति-व्रतम्, महाव्रतम्, उपनिषद्व्रतम्, गोदानञ्चेति। तत्र गोदाने गोशब्दस्यार्थो वेदवागेव प्रतीयते। एतेषां चतुर्णां वेदव्रतानां पालनं यदा न्यूनतां गतम्, तदा उपनयन- समावर्तनयोः संस्कारयोर्मध्ये वेदारम्भसंस्कारः पृथक्तया प्रवर्तितः।

उपनयनसंस्कारान्तरं बटुर्यदा वेदाध्यनं प्रारभते, तदायं संस्कारो विधीयते। तेनोपनयनं व्रतादेशस्य स्वरूपमास्थाय तिष्ठति। वेदारम्भश्च स्वतन्त्रः संस्कारो जायते। शुभे मुहूर्त गुरुः स्वशिष्यं प्रदीपाग्नेः पश्चिमत उपवेशयति। यथोक्तं हवनं च सम्पाद्य वेदाध्ययनं प्रारभ्यते।

**केशान्तसंस्कारः**

केशान्तसंस्कारस्यापरं नाम गोदानसंस्कारोऽस्ति। व्यासस्मृतौ केशान्तस्य गणना षोडशसंस्कारेषु कृता। गृह्यसूत्रेषु चूडाकर्मसंस्कारेण सहैव पृथक्तया केशान्तस्य वर्णनं लभ्यते। याज्ञवल्क्यस्मृतौ केशान्तः क्षौरकर्म कथ्यते। मनुस्मृतौ केशान्तसंस्कारस्य समयो निर्धार्यते-

केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते।
राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्वयाधिके ततः ।।[12]

अस्मिन् संस्कारे गुरवे गोदानेन सम्भवतो गोदानशब्दः प्रचालितः। गोशब्दस्यार्थो वागपि भवति। इतः पूर्वं वेदानधीत्य गोदानसंस्कारानन्तरं वैदिकव्याख्यानेऽपि प्रवर्तनाद् गोशब्दस्य वेदवागों भवितुमर्हति। तेन वेदारम्भसंस्कारप्रसङ्ग प्रोक्तेषु चतुर्षु वेदव्रतेषु चतुर्थ गोदानाख्यं व्रतमेव स्वतन्त्रसंस्कारतया विकसितं सम्भवति। गोशब्दस्यार्थः केश-श्मश्रु-लोमादिरपि भवति। तेन केशान्तो गोदानस्य पर्यायो भवति।

समावर्तनसंस्कारः

विद्याध्ययनं परिसमाप्य गुरोराश्रमाद् गृहागमनं समावर्तनम्। समावर्तनसंस्कारे विद्यासम्पन्नस्य ब्रह्मचारिणो विधिवत् स्नानं भवति। स्नानमिदं परिलक्ष्य समावर्तनस्य नामान्तरं स्नानमेव। समावर्तनसम्बन्धि स्नानमिदं कृत्वैव ब्रह्मचारी स्नातको भवति। स्नातकास्त्रिविधाः भवन्ति। विद्यया स्नातीति विद्यास्नातकः। व्रतेन (अष्टचत्वारिंशत्सङ्ख्याकेन) स्नातीति व्रतस्नातकः। विद्यया व्रतेन च स्नातीति विद्याव्रतस्नातकः । तस्मादिदं समावर्तनकालिकं स्नानं किमप्यसाधारणमेव स्नानं भवति । तादृशं स्नानं यः करोति स एव स्नातकपदवीं लभते । तथाभूतेन समावर्तनस्नानेन स्नातः स्नातकः समाजे सर्वत्र सम्मानितो भवति।

पाणिनिः स्नातकस्य पर्यायं 'स्रग्वी' इति निर्दिशति । इदं नाम स्नातकस्य मालाधारणमुद्दिश्य कृतम्। मालायामपि पुष्पाणां यद् ग्रथनं तद्वस्तुतो विद्यानां व्रतानां चैव ग्रथनमिति तात्पर्यं प्रतीयते। स्रग्वीति कथनेन सूच्यते। यत्समावर्तने स्नातकस्य वेशविन्यासः सालङ्कारो भवतीति। विद्याव्रतादिभिः सुस्नातः सुसज्जितश्च स्नातकः सुतरां शोभते। अथर्ववेदानुसारेण-

स स्नातो बधुः पृथिव्यां बहु रोचते।

समावर्तनसंस्कारे स्नातकः आचार्यं न्यवेदयत् "त्त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि" इति। आचार्योऽपि तदा स्नातकस्य शाश्वतीं शिक्षां प्रोवाच- "सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्।

भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्।

देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि, नो इत्तराणि।"

केचन ब्रह्मचारिणः समावर्तनकाले आचार्याय दक्षिणां दातुमिच्छन्ति। रघुवंशमहाकाव्ये आचार्यस्य कृते कौत्सस्य गुरुदक्षिणायाः रम्या कथा अस्ति। साधारणतस्तु, गुरुदक्षिणा स्वल्पैव भवति। तदुक्तं मनुस्मृतौ-

क्षेत्रं हिरण्यं गामश्वं क्षत्रोपानहमन्ततः।
धान्यं शाकं च वासांसि गुरवे प्रीतिमाहरन् ।।

विवाहसंस्कारः

संस्कारभावनया विधीयमानो विवाह एव विवाहसंस्कार इत्युच्यते। संस्कारस्तु शास्त्रोक्त एवेति शास्त्रविधिमुत्सृज्य विवाहो न युज्यते। विवाहे विवाहपूर्वसंस्काराणां ब्रह्मचर्यादीनां प्रतिफलनं भवति। याज्ञवल्क्यस्मृतौ "अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्" इत्युक्तम्। अथर्ववेदे चोक्तं "ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्" इति। तदेवं ब्रह्मचर्यादि- संस्कार- सम्पन्नयोरेव स्त्रीपुंसोः सम्बन्धविशेषः शास्त्रानुमोदितो भवति। स च वैवाहिकः सम्बन्धः शास्त्रोक्तैः मन्त्रैः विधिभिः च सम्पद्यते। वैवाहिकी निष्ठव अत्यावश्यकी भवति। मनुराह-

पाणिग्रहणिकाः मन्त्राः नियतं दारलक्षणम्।
तेषां निष्ठ तु विज्ञेया विद्वद्भिः सप्तमे पदे ।।

'सप्तपदी' विवाहस्य प्रधानः विधिरस्ति। तद्नुसारेण विवाहः सप्तजन्मनां सम्बन्धेन प्रतिफलति। 'नियतं दारलक्षण' मिति यदुक्तं तस्यार्थोऽपि विज्ञेयः। तदनुसारेण वैवाहिकः सम्बन्धः केवलं लौकिकसम्बन्ध एव नास्ति। अलौकिकेनापि नियमेन सम्बन्धोऽयं नियमितस्तिष्ठति। अत एव लौकिकेनैव कारणेन सम्बन्धविच्छेदो नैवात्र सम्भवति। कात्यायनस्तत्र कथयति-

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या वियुज्यते।

भारतीयसंस्कृतौ विवाहस्तु सन्तानकामाय, लौकिकसुखाय, यज्ञाधिकाराय, धर्मसम्पादनाय च भवति। संस्कारस्यास्य सातिशयं महत्त्वमस्ति। ब्रह्मचर्याश्रमे ब्रह्मचर्यमिव गृहस्थाश्रमे दाम्पत्यं प्रशस्यते। गृहिणीं विना कश्चिदपि गृही न भवति।

गृहिणी गृहमित्याहुर्न गृहं गृहमुच्यते। गृहस्थाश्रमो यज्ञपरः प्रोक्तः। यज्ञाधिकारश्च सपत्नीकस्यैव सम्भवति। सा पत्नी पुरुषस्यार्धाङ्गिनी। तस्यां पुत्रं सम्प्राप्य पुरुषः पितॄणां ऋणाद् मुक्तो भवति। 'आत्मा वै जायते पुत्रः' इत्यात्मतन्तुः संरक्ष्यते। तत्सर्वं विवाहसंस्काराधीनम्। तस्माद् विवाहस्य संस्कारमयता सर्वथैव संरक्षणीया।

मनुना विवाहस्य अष्टौ भेदाः कृताः- ब्राह्मविवाहः, दैवविवाहः, आर्षविवाहः, प्राजापत्यविवाहः, आसुरविवाहः, गान्धर्वविवाहः, राक्षसविवाहः, पैशाचविवाहश्च। मनुस्मृतौ एतेषां विवाहानां लक्षणानि यथा-

यज्ञे तु विवते सम्यगृत्विजे कर्म कुर्वते।
आलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते।।
एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्थों धर्मः स उच्यते ।।
सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥

एतेष्वष्टविधविवाहेषु ब्राह्मणादीनां कृते यथायोगं केचित् प्रशस्ताः, केचिदप्रशस्ताश्च कथ्यन्ते। सामान्येन प्रारम्भिकाश्चत्वारो धर्माः, पार्यन्तिकाश्चाधर्ष्याः प्रोक्ताः। यथाकथञ्चित् केषाजन कृते पडमषष्ठावपि (आसुरगान्धर्वाख्यौ) धर्मानुकूलौ स्याताम्। किन्तु सप्तमाष्टमौ (राक्षसपैशाचौ) सर्वथैव धर्मविरुद्धौ परित्याज्यौ च स्तः। अर्थादेतेषु विवाहभेदेषु संस्कारस्य वास्तविकोऽर्थः सर्वत्र नावलोक्यते। एते विवाहा यथायोगं स्त्रीप्राप्तेरुपायभूताः सन्ति। वैवाहिकः संस्कारविधिस्तदन्तरं सम्पादनीयः। तदुक्तं देवलेन-

प्राप्तेषूर्ध्वं विवाहेषु विधिवैवाहिकः स्मृतः।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ।।

अन्यथा-

विवाहमात्रं संस्कारं शूद्रोऽपि लभते सदा।

सगोत्रेषु सपिण्डेषु समानप्रवरेषु च विवाहो निषिद्धः। अनुलोम-प्रतिलोमयोर्मध्ये अनुलोमविवाह एव शास्त्रसम्मतो भवति । तदनुसारेण ब्राह्मणक्षत्रियवैश्यवराणां क्रमशः चतुस्त्रिद्विवर्णोत्पन्नाभिः कन्याभिर्विवाहो योग्यः।

षड्वर्षादुर्ध्वं रजोदर्शनात् पूर्वञ्च कन्यानां विवाहः पुरा प्रशंसितः। भागवतानुसारेण –

ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित्।।

अन्त्येष्टिसंस्कारः

निवृत्तिप्रधानः अन्त्येष्टिसंस्कारः सर्वैरपि शास्त्रकारैः संस्कारतया न गण्यते। बहुभिराचार्यैः संस्कारप्रकरणादन्यत्र पृथक्तया अन्त्येष्टिविषये विलिखितम्। तेषां मतेन विवाह एव चरमः संस्कारः। तदनुसारेण विवाहसंस्कारानन्तरं गर्भाधानादिसंस्काराः एवं पुनरावर्न्ते। यद्यपि ऋग्वेदे अथर्ववेदे च अन्त्येष्टिक्रियासु प्रयोज्याः मन्त्राः सन्ति, तथापि गृह्यसूत्रेषु, धर्मसूत्रेषु, स्मृतिषु संस्कारोऽयं प्रायशः उपेक्षित एव। आश्वलायन-बौधायन-पारस्कर-गृह्यसूत्रेषु अन्त्येष्टिसंस्कारः परिगणितोऽस्ति। हिरण्यकेशिगृह्यसूत्रे अन्त्येष्टिक्रियाकलापानां प्रतिपादनं कृतम्। मनुस्मृतौ - "निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः"

इत्युल्लिख्य अन्त्येष्टिं संस्कारतया स्पृशति, पितॄणां प्रीतये श्रद्धादिकं च वर्णयति। याज्ञवल्क्यस्मृतावपि संस्कारोऽमयुल्लिखितः। श्राद्धकल्पेषु अन्त्येष्टिसंस्कारस्य विषयाः पर्याप्तं प्रतिपादिताः। परवर्तिकाले अन्त्येष्टिमधिकृत्य बह्व्यः बह्व्यः पद्धतयोऽपि विलिखिताः।

अन्त्येष्टिः हिन्दूजीवनस्य चरमः संस्कारोऽस्ति। अन्त्या अन्तिमा, इष्टिः- यज्ञः। तस्मादयं संस्कारो जीवनस्यान्तिमयज्ञ एव। संस्कारोऽयं मृत्योरनन्तरं शवदाहादिरूपो भवति। संस्कारस्यास्य सम्यक् सम्पादनेन मृतकस्याग्रिमं जन्म निर्बाधं सम्पद्यते। गीतायामुक्तम्-

वासांसि जीवर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देही ।।[13]

सन्दर्भः

1. तैत्तिरीयसंहिताभाष्यम् - उपोद्घातः

2. पा.शि.41-42
3. क.श्रौ.सू. 1.1.1
4. क.श्रौ.सू. 1.1.2
5. क.श्रौ.सू. 1.1.3
6. मनु.स्मृ. 3.48
7. मनु.स्मृ.2.29
8. मनु.स्मृ. 2.30
9. मनु.स्मृ. 2.30, 31,32,33
10. छान्दोग्य उप. 7.26.2
11. मनु.स्मृ.2.37
12. मनु.स्मृ. 2.65
13. श्रीमद्भगवद्गीता 2.22

## सन्दर्भग्रन्थसूची -


- कात्यायन श्रौतसूत्रम्,जमुना पाठक, चौखम्बा प्रकाशन, वाराणसी, 2010
- मनुस्मृति, हरगोविन्द शास्त्री , चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५
- वैदिक साहित्य का इतिहास, राममूर्ति शर्मा, खम्बा प्रकाशन, वाराणसी, २०१०
- श्रीमद्भगवद्गीता, गीता प्रेस, गोरक्षपुर, 2005


* * *